# नेपालेश्वरसंग भिक्षा याचना

—जगदीशचन्द्र रेग्मी

यो शीर्षकको भाव मेरो हैन यो धारणा वा उद्देश्य ति. पा. सुब्रह्मण्य शास्त्री नामका व्यक्तिको हो जसले दुई पाना मझिसे फुलस्केप पानामा गोलसजन मसीले लेखेका छन् र नेपालका राजालाई सन् १९०१ मा पठाएका रहेछन् । यो कागत कता कताबाट मेरो हातमा आइं-पुग्न गएको हो ।

उक्त वर्णित विज्ञप्ति पत्रको अन्त्यमा अंग्रेजीमा प्रेषकको ठेगाना जे लेखिएको छ त्यो राम्ररी बुझिदैन तर श्लोकमा "चेलमण्डल निरुपत्री" (श्लोक-५) भनिएको छ र यसले सम्भवतः केरल अर्थ्याएको छ ।

भिक्षा याचक सुब्रह्मण्य शास्त्रीले ३८ अनुष्टुभ् श्लोकमा बिना नाम्मोलेख नेपालका राजाको वर्णन पूर्वक आत्मपरिचय, आफ्नो गरीबीको बयान साथै आफूले कविता बनाउन थालेको वर्णन गरेका छन् । तर ती कविता बुझ्ने मान्छे पनि छैनन् सम्मान पाउने कुरा त परै रह्यो । तिनको प्रकाशनको लागि यताउति भौंतारिएँ व्यर्थै परिश्रम मात्रै भयो । यताका मानिसहरू संस्कृत भाषाको कदर गर्दैनन् । थोरैको कदर त भएको छ, ती पनि उस्तै छन् । यहाँनेर सुब्रह्मण्य शास्त्रीले आफ्नै देशवासीहरूलाई निन्दा पनि गरेका छन्:-

न शृणोति सश्रुत्कपि
सचक्षुरपि नेक्षते ।
न भाषते सवक्तोपि
दाक्षिणात्यो जनो धनी ।। इत्यादि

यस्तै स्थितिमा दुःखी भइरहेको समयमा स्वयं देवी वाणीले मलाई नेपालका राजा सर्वगुणसम्पन्न हुनु हुन्छ उहाँको शरण पर भनेकोले यो विन्तिपत्र पठाएको हूँ भन्ने भाव श्लोकमै बयान गरेर आफ्ना ५० फुटकर काव्य रचनाको सूची पनि प्रस्तुत गरेका छन् ।

पत्र प्रेषक शास्त्रीजीको कलम चलेको नै देखिन्छ किनभने एक दुई राम्रा सूक्ति यसैमा पनि परेका देखिन्छन् तैपनि तिनी पोख्त त थिएनन् भन्न सकिन्छ । यी पद्य-हरूमा शुद्धाशुद्धिको स्थिति के छ भन्ने कुरा त मेरो आँट-भन्दा बाहिरको कुरा पर्‍यो । उक्त चिट्ठी नेपालका राजाकहाँ त आइपुग्यो तर याचकको कल्पना फलिभूत भयो कि भएन भन्ने कुरा अज्ञात छ । यसबारे कसैलाई थाहा हुन गए त्यस सम्बन्धी विवरणको प्रकाशन होला भन्ने आशा पनि गर्न सकिन्छ । मूल पत्रको उतार तल प्रस्तुत छ ।

स्वस्त्यस्तु

श्रीमतः पर्वतेशानपुण्यप्रत्यंन्तवर्तिनः ।
ऋद्धिर्नेपालराज्यस्य वर्धतां सुखदायिनी ।।१।।
अभिषिक्तस्य तत्रेन्द्रनारायणमहीपतेः ।
महाराजादिविरुदराजिनस्य महाधियः ।।२।।
सोवितस्य प्रकृतिभिस्समृद्धर्द्धैः कटाक्षतः ।
श्रीमतश्चन्द्रचूडस्य भक्तवर्गानुकंपिनः ।।३।।
सन्निधानेन प्रणम्रेण सुब्रह्मण्येन सूरिणा ।
विज्ञापनाद्यक्रियते श्रूयतामिदमादरात् ।।४।।

जातोऽहं तिरुनत्रीवेलमंडलवर्तिनि ।
अन्ववाये श्रोत्रियस्य धरणीशरणस्य च ॥५॥
पितोपनीय मां देववाणीमध्याप्य कामपि ।
शिशुत्वरावमेयातः पञ्चत्वमनिवारितम् ॥६॥
वपुषः पोषकाभा (वा) दुपदेष्टुरभावतः ।
अनादराश्च मे भ्रातुः कष्टमन्तमवं चिरम् ॥७॥
कथमप्यथगीर्देवीं शरण्यां शरणं गतः ।
अनुजग्राहमादीनं सा कृपालुतयाऽऽत्मनः ॥८॥
केनचित्त्वथकालेन गतेनच्छंदमात्मनः ।
ग्रथितुं श्लोकरूपेण शक्तिरासीत्प्रभावतः ॥९॥
ततः प्रभृति यं वेशमगच्छं यं व्यलोकयम् ।
श्लोकानकरवं कृत्वा तमेव कतिचित्प्रभो ॥१०॥
इत्थं विरचितान् श्लोकान् दृढा संदर्श्य चेतरान् ।
प्रीतिमीषून्न चैवायं कांचनापि प्रयत्नतः ॥११॥
ये मया रचिताः श्लोका यत्नेनापि समर्पिताः ।
तान् द्रष्टुमपि नेच्छंति नराश्चेत् क्व तदादरः ॥१२॥
प्रकाशनेच्छया तेषां मया भ्रान्तमितस्ततः ।
भ्रमराव मया लब्धस्तृषार्तेणोषरे यथा ॥१३॥
किं च गीर्वाणभाषायां नात्रत्यानां समादरः ।
कृतादराः संति यदि विरलाराघतेजनाः ॥१४॥
तेष्वपि प्रायशो राजन् केचिद्वेदांतवेदिनः ।
तत्वोपदेशं कुर्वन्ति न हरंति परं शुचम् ॥१५ ।
ईश्वरास्तित्वविषये संशयः कस्य वर्तते ।
यथामति विजानाति सर्वोपीश्वरमात्मनि ॥१६॥
दुःखिताय व्याधिताय क्षुधिताय पिपासवे ।
दुःखापनोदः कार्यः किमुपदेशोत्रवोचितः ॥१७॥
न शृणोति सकर्णोपि सचक्षुरपि नेक्षते ।
न भाषते सवक्तोपि दाक्षिणात्यो जनो धनी ॥१८॥
निसर्गमत्सराश्चान्ये दोषान्वेषणतत्पराः ।
गुणस्य न गृहीतारो न कथं चिच्छ्रमारहाः ॥१९॥
एवं मे सुमहांछोको हृदये नृपते ! दृढम् ।
दुर्निवार्यश्चिरेणाभूत्प्रयत्नेनापि केनचित् ॥२०॥
वृथा मम श्रमो जातो यः कृतोऽध्ययनाय मे ।
प्रकाश इव दीपस्य विधृतस्य वनेऽजने ॥२१॥
तेन शोकेन महता व्यक्तान्यविषयस्पृहः ।
व्यथितात्मा समभवं चिंतयन्देवतां गिराम् ॥२२॥
अथ देवी स्वयं वाणी मां चोदयति वत्सला ।
गच्छोपकंठं वत्साद्य श्रीमन्नेपालभूपतेः ॥२३॥
स भूपालकुलश्रेष्ठो दयावान् सुमहायशाः ।
विद्वत्प्रियः कल्पतरुर्दरिद्राणां विशेषतः ॥२४॥
धर्मात्मा सप्रजाः शास्ति यथान्यायं महीपतिः ।
न हि दुर्भिक्षवार्तास्ति तद्देशे शोभने क्वचित् ॥२५॥
परिपूर्ण ................णया तत्रैवा......च संततम् ।
भगवां................पार्वत्याः............यम् ॥२६॥
तत्र वर्षति पर्जन्यो यथाकालमतन्द्रितः ।
फलंत्योषधयस्सर्वा विफलं न हि किंचन ॥२७॥
न कश्चिन्निजमुल्लंघ्य धर्ममाश्रयते परम् ।
यद्यद्वस्तु यथाभूयात्तत्तथैव नान्यथा ॥२८॥
न चास्त्यहिभयं तत्र न ददाति करं तथा ।
न चलत्यन्यविषयं पयोनिधिरिवाचलः ॥२९॥
एकास्मिन्निश्चितमतिर्द्विबाहुस्थितकाश्यपिः ।
चतुरंगवलोपेतश्चाष्टैश्वर्यसमन्वितः ॥३०॥
षोडशोर्वीपतिश्रेष्ठो द्वात्रिंशल्लक्षणान्वितः ।
चतुष्षष्ठिकलाप्राज्ञः चतुरः सर्वकर्मसु ॥३१॥
संशयं त्वं परित्यज्य भज वत्सास्य सन्निधिम् ।
अहं तन्मनसि स्थित्वा ब्रवीमि तव दुर्दशान् ॥३२॥
विधास्यति स ते श्रेयः शोकं व्यपनुदन्नृपः ।
अंधकारं नुदन् भास्वान् प्रकाशं जगतो यथा ॥३३॥
श्रीदेवी च मम श्वश्रूस्तं सम्राजं निषेवते ।
प्रीतिं चोपगता तेन प्राप्स्यति त्वामसंशयम् ॥३४॥
इत्याज्ञप्तोस्मि राजेन्द्र गिरां देवतयानया ।
प्राप्तवानतरावाहं सन्निधिं भवतोधुना ॥३५॥
रचिता ये मया श्लोका वित्ताभावदमुद्रिताः ।
हस्तेन लेखने तेषां त्वदाज्ञां प्रतिपालयन ॥३६॥
तन्नामसंख्याज्ञानार्थं पट्टिकाधो विलिख्यते ।
इत्थं मदीया विज्ञप्तिः पादमूले विराजताम् ॥३७॥
अतः परं वे (दे ?) वपादः प्रमाणमिति निश्चयः ।
देवस्य श्रीमतः शंभोः कृपा त्वयि विजृंभताम् ॥३८॥

सुब्रह्मण्यशास्त्रीकृतग्रन्थ नामपट्टिका

| क्रम संख्या | ग्रन्थनामानि | ग्रन्थ संख्या |
|---|---|---|
| १. | रुक्मिणीपरिणयः | ३०० |
| २. | लोकपालस्तवः | १२० |

| क्रम संख्या | ग्रन्थनामानि | ग्रन्थसंख्या |
|---|---|---|
| ३. | पादुकाष्टोत्तरशतम् | १०८ |
| ४. | पद्मनाभशतकम् | १०० |
| ५. | रामनाथशतकम् | १०० |
| ६. | नवग्रहस्तवः | ८१ |
| ७. | शारदाकण्ठाभरणम् | ५० |
| ८. | नृसिंहपञ्चाशती | ५० |
| ९. | विघ्नेश्वरमानसिकपूजा | ३० |
| १०. | नृसिंहदशश्लोकी | १० |
| ११. | चन्द्रमौलीश्वराष्टकम् | ८ |
| १२. | कृष्णाष्टकम् | ८ |
| १३. | गंगाष्टकम् | ८ |
| १४. | अंबाष्टकम् | ८ |
| १५. | लक्ष्म्यष्टकम् | ८ |
| १६. | सरस्वत्यष्टकम् | ८ |
| १७. | शुकवनेश्वराष्टकम् | ८ |
| १८. | आंजनेयाष्टकम् | ८ |
| १९. | नृसिंहाष्टकम् | ८ |
| २०. | सूर्याष्टकम् | ८ |
| २१. | ब्रह्मेश्वराष्टकम् | ८ |
| २२. | त्रिपुरसुंदर्यष्टकम् | ८ |
| २३ | यमुनाष्टकम् | ८ |
| २४. | कावेर्यष्टकम् | ८ |
| २५. | अर्धनारीश्वराष्टकम् | ८ |
| २६. | वेंकटेशाष्टकम् | ८ |
| २७ | वरदराजाष्टकम् | ८ |
| २८. | महालक्ष्म्यष्टकम् | ८ |
| २९. | गजलक्ष्म्यष्टकम् | ८ |
| ३०. | रामनाथाष्टकम् | ८ |
| ३१ | पर्वतवर्धन्यष्टकम् | ८ |
| **क्रमसंख्या** | **ग्रन्थनामानी** | **ग्रन्थसंख्या** |
| ३२. | विघ्नेश्वराष्टकम् | ८ |
| ३३. | पादुकाष्टकम् | ८ |
| ३४. | रामदंडकम् | ८ |
| ३५ | रंगनाथाष्टकम् | ८ |
| ३६. | अन्नपूर्णाम्बिकाष्टकम् | ८ |
| ३७. | भिक्षेश्वराष्टकम् | ८ |
| ३८. | गौरीशंकराष्टकम् | ८ |
| ३९. | लक्ष्मीनारायणाष्टकम् | ८ |
| ४०. | शारदाष्टकम् | ८ |
| ४१. | सुब्रह्मण्याष्टकम् | ८ |
| ४२. | गुरुवाथाष्टकम् | ८ |
| ४३. | अङ्गनाथेश्वराष्टकम् | ८ |
| ४४, | सुपुत्रजनन्यष्टकम् | ८ |
| ४५. | कालहस्तीश्वराष्टकम् | ८ |
| ४६. | ज्ञानप्रसूनाष्टकम् | ८ |
| ४७. | कपालीश्वराष्टकम् | ८ |
| ४८. | कल्पलतांबाष्टकम् | ८ |
| ४९. | नृसिंहभारतीपादाष्टकं | ८ |
| ५०. | विद्याशंकराष्टकम् | ८ |

गतहीणाब्ददशममासे (ह) नि तुरीयके ।
विज्ञप्तिरेषा प्रहिता श्रीमतः सन्निधि मया ॥
किमेषा संनिधि प्राप्ता महाराजाथवा न वा ।
इति सांशयिकेमैषा पुनश्च प्रहिता मया ॥
ति. पा सुब्रह्मण्य शास्त्री

6.1.01 T.P. Subrahmanya Shastri
Naucakaty Teacher
Girl's School
Naucakal
Talewa District